श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीवण्शठकोप श्रीश्रीनिवास यतीन्द्र महादेशिकैरनुगृहीतं

# ॥ नवनारसिंह मङ्गळाशासनम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥नवनारसिंह मङ्गळाशासनम्॥

श्रीपराङ्कुशयोगीन्द्र शठारिप्रमुखान् गुरून्।
मङ्गळाशासनपरान् महितानिशं भजे॥ 1॥

जगज्जन्मादिलीलाय जगदानन्दहेतवे।
जगच्चक्षुर्निवासाय श्रीनृसिंहाय मङ्गळम्॥ 2॥

हिरण्यस्तम्भसंभूतिप्रख्यात परमात्मने।
प्रह्लादार्तिमुषे ज्वालानारसिंहाय मङ्गळम्॥ 3॥

गुरुडाद्रिगुहागेहे गजकुण्डसरस्तटे।
हिरण्यस्थाण्वहंकारहारि सिंहाय मङ्गळम्॥ 4॥

वारिजावारित भयैः वाणीपतिमुखैस्सुरैः।
महिताय महोदार मालोलायास्तु मङ्गळम्॥ 5॥

वराहकुण्डे मेदिन्यै वराहार्थप्रदायिने।
दन्तलग्न हिरण्याक्ष दंष्ट्र सिंहाय मङ्गळम्॥ 6॥

गोभूहिरण्यनिर्विण्ण गोभिलज्ञानदायिने।
प्रभञ्जन शुनासीर रञ्जकायास्तु मङ्गळम्॥ 7॥

भार्गवाख्य तपस्वीश भावना भावितात्मने।
अक्षय्य तीर तीरस्थ भार्गवायास्तु मङ्गळम्॥ 8॥

चतुरानन चेतोब्ज चित्रभानुस्वरूपिणे।
वेदाद्रि गह्वरस्थाय योगानन्दाय मङ्गळम्॥ 9॥

हाहाहूह्वाख्य गन्धर्वनृत्त गीत हृतात्मने।
भवहन्तृतटच्छत्रवट सिंहाय मङ्गळम्॥ 10॥

भारद्वाजमहायोगि महापातक हारिणे।
तापनीय रहस्यार्थ पावनायास्तु मङ्गळम्॥ 11॥

श्रीशठारि यतीन्द्रादि योगिहृत्पद्म भानवे।
सर्वत्र परिपूर्णायाहोबिलेशाय मङ्गळम्॥ 12॥

मङ्गळाशासनमिदं मानिवास मुनीरितम्।
महनीयं पठन् शृण्वन् मङ्गळायतनं भवेत्॥ 13॥

॥ इति नवनारसिंह मङ्गळाशासनं समाप्तम्॥